अस्योत्पत्तिर्यथा,—
"मरीचेः कश्यपो जज्ञे तस्माज्जज्ञे विभावसुः ।
तस्य भार्य्याभवत् संज्ञा पुत्त्री त्वष्टुः प्रजापतेः ॥
नातितेजोमयं रूपं सोढुं सालं विवस्वतः ।
मायामयीं ततश्छायां सवर्णां निर्म्ममे स्वतः ॥
संज्ञोवाच ततश्छायां सवर्णे शृणु मे वचः ।
अहं यास्यामि सदनं पितुस्त्वं पुनरत्र मे ।
भवने वस कल्याणि निर्विशङ्कं ममाज्ञया ॥
इति च्छायां गृहे स्थाप्य संज्ञागात् पितुरालयम् ।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः ॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते ।
शनैश्चरं द्वितीयञ्च सुतं भद्रां तृतीयिकाम् ॥"
इति ब्राह्मे स्वर्गखण्डे ११ अध्यायः ॥
तस्य क्रूरदृष्टेः कारणं यथा,—
"एतस्मिन्नन्तरे तत्र द्रष्टुं शङ्करनन्दनम् ।
आजगाम महायोगी सूर्य्यपुत्त्रः शनैश्चरः ॥
अत्यन्तानम्रवदन ईषन्मीलितलोचनः ।
द्वारिणं शूलहस्तञ्च विशालाक्षमुवाच ह ॥
शनैश्चर उवाच ।
शिवाज्ञया शिशुं द्रष्टुं यामि शङ्करकिङ्कर ।
विष्णुप्रमुखदेवानां मुनीनामनुरोधतः ॥
विशालाक्ष उवाच ।
आज्ञावहो न देवानां नाहं शङ्करकिङ्करः ।
द्वारं दातुमशक्तोऽहं विना मन्मातुराज्ञया ॥
ददौ वर्त्म ग्रहेशाय चक्षुःकोणाज्ञया ततः ।
शनिरभ्यन्तरं गत्वा ननामानम्रकन्धरः ॥
रत्नसिंहासनस्थाञ्च पार्व्वतीं सस्मितां मुदा ।
नतं सूर्य्यसुतं दृष्ट्वा दुर्गा संभाष्य यत्नतः ।
शुभाशिषं ददौ तस्मै पृष्ट्वा तत्कुशलं शुभा ॥
पार्व्वत्युवाच ।
कथमानम्रवक्त्रस्त्वं श्रोतुमिच्छामि साम्प्रतम् ।
कथं न पश्यसि मां साधो बालकञ्च ग्रहेश्वर ॥
शनिरुवाच ।
सर्व्वे स्वकर्म्मणः साध्वि भुञ्जते वाञ्छितं फलम् ।
शुभाशुभं वा यत् कर्म्म कोटिकल्पैर्न लुप्यते ॥
इतिहासं चातिगोप्यं शृणु शङ्करवल्लभे ।
अकथ्यं जननीसाक्षाल्लज्जाजनककारणम् ॥
आबाल्यात् कृष्णभक्तोऽहं कृष्णध्यानैकमानसः ।
तपस्यासु रतः शश्वद्विषये विरतः सदा ॥
पिता ददौ विवाहेन कन्यां चित्ररथस्य च ।
अतितेजस्विनी शश्वत्तपस्यानुरता सती ॥
एकदा सा ऋतुस्नाता सुवेशं स्वं विधाय च ।
रत्नालङ्कारसंयुक्ता मुनिमानसमोहिनी ॥
हरिपादं ध्यायमानं सा मां पश्यन्त्युवाच ह ।
मत्समीपं समागत्य सस्मिताननलोचना ।
शशाप मामपश्यन्तमृतुनष्टा स्वकोपतः ।
वाह्यज्ञानविहीनञ्च ध्यानैकतानमानसम् ॥
न दृष्टाहं त्वया येन न कृतं ऋतुरक्षणम् ।
त्वया दृष्टन्तु यद्यत्तु मूढ़ सर्व्वं विनश्यति ॥
अहञ्च विरते ध्याने तामतोषं पुरा सतीम् ।
शापं मोक्तुं न शक्ता सा पश्चात्तापं चकार ह ॥
तेन मातर्न्न पश्यामि किञ्चिद्वस्तु स्वचक्षुषा ।
ततः प्रभृति नम्रास्यः प्राणिहिंसाभयादहम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ११ अध्यायः ॥ * ॥
अस्य भोगकालो यथा,—
"रविर्मासं निशानाथः सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्त्रो बुधोऽष्टादश वासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशद्दिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः सार्द्धवत्सरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
तस्य जपमन्त्रो यथा,—
"प्रणवं वाग्भवं मायां श्रीमुद्धृत्य शनैश्चरम् ।
चतुर्थ्यन्तं मनुः प्रोक्तः रविसूनोर्नवाक्षरम् ॥"
ओँ ऐँ ह्रीँ श्रीँ शनैश्चराय । इति रुद्रयामलम् ।
ऊर्द्धपाणिस्त्वमन्त्रं जपेत् । यथा,—
"सूर्य्यारराहुमन्दानामूर्द्धपाणी जपेद्बुधः ।
सोमकेत्वोरधः पार्श्वोरन्येषां शुद्धपाणिकः ॥"
इति च रुद्रयामलम् ॥
तस्य होममन्त्रो यथा । ओँ शन्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः । यथा शनैश्चरायेति पुनः शन्नो देवीति होमयेत् । इत्युद्वाहतत्त्वधृतमत्स्यपुराणम् ॥ * ॥ वारविशेषः तत्र वारवेला यथा,—
"कृतमुनियमशरमङ्गल-
रामर्त्तुभास्करादियामार्द्धे ।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय ॥" * ॥
तत्र कालवेला यथा,—
"कालस्य वेला रवितः शराब्धि-
कालानलागाम्बुधयो गजेन्दू ।
दिने निशायामृतुवेदनेत्र-
नगेषु रामा विधुदन्तिनौ च ॥"
तत्र कुलिकवेला यथा,—
"षष्ठाष्टकं दिनेशात् क्रमश इह दिने मन्त्रि-चण्डेश्वरीक्तः
पूर्व्वे वारार्द्धयामः कुलिक इह परो मध्यमश्चाति कालः ।"
तद्दिने पूर्व्वदिग्गमननिषेधो यथा,—
"शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्द्वोश्च दिने न शक्रककुभं याम्यां गुरौ न व्रजेत् ॥" * ॥
तत्र प्रथमरजोयोगे दोषो यथा,—
"आदित्ये विधवा नारी सोमे चैव पतिव्रता ।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च ॥
बृहस्पतौ पतिः श्रीमान् शुक्रे चापत्यमेव च ।
शनौ बन्ध्यां विजानीयात् प्रथमे स्त्री रजस्वला ॥
इति ज्योतिस्तत्त्वम् ॥
अथ नवानां ग्रहाणां दानानि ।
"सूर्य्ये धेनुञ्च ताम्रञ्च गोधूमं रक्तचन्दनम् ।
चन्द्रे चन्दनशङ्खौ च वस्त्रञ्च तिलतण्डुलान् ॥
कुजे वृषः प्रदातव्यो रक्तवस्त्रं गुड़ौदनम् ।
बुधे कर्पूरमुद्गञ्च हरिद्वस्त्रं हिरण्यकम् ॥
पीतवस्त्रद्वयं जीवे हरिद्राकनकानि च ।
अश्वः शुक्रे सितो देयः शुक्लधान्यानि यानि च
शनौ च सतिला देया कृष्णा गौर्लौहमुत्तमम् ।
राहौ च महिषोच्छागौ माषाश्च तिलसर्षपाः ॥
अजामेषौ च दातव्यौ केतौ चान्नञ्च मिश्रितम्
स्वर्णगोविप्रपूजाभिः सर्व्वेषां शान्तिरुत्तमा ॥"
इति ज्योतिस्तत्त्वम् ॥
ग्रहाणां बलयो यथा,—
"गुड़ौदनं पायसञ्च हविष्यं क्षीरषष्टिकम् ।
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ॥
दद्यात् ग्रहक्रमादेवं द्विजेभ्यो भोजनं बुधः ।
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्व्वकम् ॥
ग्रहाणां दक्षिणा यथा,—
"धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा ।
कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात्
इति संस्कारतत्त्वम् ॥

**शनिचक्रं**, क्ली, (शनेश्चक्रम् ।) नृणां शुभाशुभज्ञानाय शनिभोग्यनक्षत्रादिसप्तविंशतिनक्षत्रयुक्तनराकारचक्रम् । यथा,—
"शनिचक्रं नराकारं लिखित्वा सौरिभादितः
नाम ऋक्षं भवेद्यत्र फलं तत्र शुभाशुभम् ॥
एकं मुखे दक्षहस्ते चत्वारि षट् पदद्वये ।
हृदि पञ्च करे वामे चत्वारि मस्तके त्रयम् ॥
द्वयं नेत्रद्वये गुह्ये द्वयं तत्र न्यसेद्बुधः ।
मुखे हानिर्जयो दक्षे भ्रमः पादे श्रियो हृदि ।
वामे भीर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे ॥
तूर्य्याष्टद्वादशे ऋक्षे यदा विघ्नकरः शनिः ।
तदा सौख्यं वपुःस्थन्तु हृच्छीर्षे नेत्रदक्षयोः ॥
तृतीयैकादशे षष्ठे यदा सौख्यकरः शनिः ।
तदा विघ्नः शरीरस्थो गुह्ये वक्त्रेऽङ्घ्रिवामयोः ॥
यस्य पीड़ाकरः शौरिस्तस्य चक्रं फलन्त्विदम्
लिखित्वा कृष्णद्रव्येण तैलमध्ये क्षिपेत्ततः ॥
निक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः प्रपूजयेत् ।
तुष्टिं याति न सन्देहः पीड़ां त्यक्त्वा शनैश्चरः ॥
इति ज्योतिस्तत्त्वम् ॥

**शनिप्रसूः**, स्त्री, ( शनेः प्रसूर्जननी । ) छाया । सूर्य्यपत्नी । इति भूरिप्रयोगः ॥

**शनिप्रियं**, क्ली, ( शनेः प्रियम् । ) नीलमणिः । इति केचित् ॥

**शनिवारः**, पुं, (शनिभोग्यः शनेर्वा वारः ।) शनिभोग्यसावनदिनम् । तत्तु उदयादोदयकालः । यथा,—
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिताः ॥"
दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनशब्देनोक्तम् ।
"उदयादोदयाद्भानोर्भौमसावनवासराः ॥"
इति तिथ्यादितत्त्वम् ॥
शतभिषानक्षत्रयुक्तमधुकृष्णत्रयोदश्यां शनिवारयोगे महावारुणी स्यात् । यथा । स्कन्दपुराणे
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ।